# श्री रामचंद्र स्तुति

नमामि भक्तवत्सलं कृपालु शील कोमलं भजामि ते पदांबुजं अकामिनां स्वधामदं |
निकाम श्याम सुंदरं भवांबुनाथ मन्दरं प्रफुल्ल कंज लोचनं मदादि दोष मोचनं || १ ||

प्रलंब बाहु विक्रमं प्रभो5प्रमेय वैभवं निषंग चाप सायकं धरं त्रिलोक नायकं |
दिनेश वंश मंडनं महेश चाप खंडनं मुनींद्र संत रंजनं सुरारि वृंद भंजनं || २ ||

मनोज वैरि वंदितं अजादि देव सेवितं विशुद्ध बोध विग्रहं समस्त दूषणापहं |
नमामि इंदिरा पतिं सुखाकरं सतां गतिं भजे सशक्ति सानुजं शची पति प्रियानुजं || ३ ||

त्वदंघ्रि मूल ये नरा: भजन्ति हीन मत्सरा: पतंति नो भवार्णवे वितर्क वीचि संकुले |
विविक्त वासिन: सदा भजंति मुक्तये मुदा निरस्य इंद्रियादिकं प्रयांति ते गतिं स्वकं || ४ ||

तमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं जगद्गुरुं च शाश्वतं तुरीयमेव मेवलं |
भजामि भाव वल्लभं कुयोगिनां सुदुर्लभं स्वभक्त कल्प पादपं समं सुसेव्यमन्वहं || ५ ||

अनूप रूप भूपतिं नतो5हमुर्विजा पतिं प्रसीद मे नमामि ते पदाब्ज भक्ति देहि मे |
पठंति ये स्वतं इदं नरादरेण ते पदं व्रजंति नात्र संशयं त्वदीय भक्ति संयुता: || ६ ||

## इति श्री रामचंद्र स्तुति सम्पूर्ण

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133